International Research Journal of Human Resource and Social Sciences
ISSN(O): (2349-4085) ISSN(P): (2394-4218)
Impact Factor 7.924 Volume 11, Issue 12, Dec 2024
Website- www.aarf.asia, Email : editoraarf@gmail.com

# ज्योतिषशास्त्रदिशा वैवाहिकसम्बन्धचयनम्

**-डॉ. विजयलक्ष्मीमहापात्रः**
सहायकाचार्या , ज्योतिषविभागः
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीसदाशिवपरिसरः, पुरी, ओडिशा

मानवानां सफलवैवाहिकजीवनयापनाय ज्यौतिषशास्त्रस्योपयोगी सिद्धान्तानां महनीयता अस्तीति कथने नास्ति काचित् विप्रतिपत्तिः। सफलवैवाहिकजीवनाय वरवध्वोः राशिमेलापकं कर्तुं विधानमस्ति। येन दाम्पत्यजीवनं सुखमयं भवेदिति। इदानीन्तनकाले तु दाम्पत्यजीवनं प्रायः कलहयुक्तं कष्टकरञ्चावलोक्यते। यतोहि अधिकाधिकानां वरवधूनां चयनार्थमस्माकं ज्योतिषशास्त्रोपयोगं न कुर्वन्ति। फलतः तेषां दुःखमयं जीवनं समुचितमेव।

विवाहात् पूर्वं वरवध्वोः जन्मकुण्डलीमेलापकः केवलं परम्परयाः निर्वहणं न, अपि तु वरवध्वोः स्वभाव-गुण-प्रेमाचारव्यवहारादि सम्बन्धज्ञानार्थं च भवति। स्वभावभिन्नता हेतोः पुरुषः समस्तस्त्रीणां कृते योग्यो न भवति। अतः योग्यायोग्यत्वस्य विचारः करणीयः। देशस्य समाजस्याभिन्नाङ्गत्वेन स्त्री-पुरुषयोः सहभागिता आवश्यकी। स्त्री-पुरुषयोः योग्यायोग्यसंयोगेनैव कुलाचारितपुत्रस्य पुत्र्यार्वा उत्पत्तिर्भवति। अत एतस्य विचारः सर्वशास्त्रसम्मतः एव। एतज्ज्ञानार्थं विवाहमेलापकस्य विचारः क्रियते।

वरबध्वोः राशिनक्षत्रयोः मेलापकेन तयोः शारीरिक-मानसिक-बौद्धिकस्तथा आध्यात्मिकस्वभावादि गुणानां परिशीलनं क्रियते। यदि तयोः स्वभावौ समानौ भवतः तर्हि तयोः सम्बन्धे एकता अन्यथा कलहः कष्टादिभावाः परिदृश्यन्ते। अस्माकं शास्त्रेषु विवाहः परमपवित्रसंस्कारत्वेन गण्यते। अनेन द्वौ आत्मनौ मिलितौ भवतः। मेलापकेन प्रमाणीतो भवति यत् विवाहसंस्कारः स्थायीधर्मयुक्तः तथा चिरप्रशंसनीयः स्यादिति। येन सम्पूर्णराष्ट्रस्य कल्याणं सम्भाव्यते। अतः विवाहेत् पूर्वं वरवध्वोः जन्मपत्रयोः

© Association of Academic Researchers and Faculties (AARF)

मेलापकः महन्महत्त्वपूर्णोऽस्ति। विन्ध्योत्तरभागेषु अष्टविधमेलापकविधिः प्रचलितः भवति। यथा (१) वर्णः, (२) वश्यः, (३) तारा, (४) योनिः, (५) ग्रहमैत्री, (६) गणमैत्री, (७) भकूटं, (८) नाडी। तद्यथा -

**वर्णो वश्यस्तथा तारा योनिश्च ग्रहमैत्रकम्।**
**गणमैत्रं भकूटं च नाडी चैते गुणाधिकाः॥**[1]

कुत्रचित् वर्ण-वश्य-तारा-नृदूर-योनि-ग्रहमैत्री-गणमैत्री तथा नाडी एते नवविधमेलापकविचारः प्रचलितो भवति। एतेषां सह वर्गयोजनेन दशविधमेलापकविधिः कुत्रचित् प्रचलितो दृश्यते। दक्षिणदेशेषु भिन्नप्रकारेण दशविधमेलापकविधिः दृश्यते। तद्यथा दिन-गण-माहेन्द्र-स्त्रीदीर्घ-योनि-भकूट-ग्रहमैत्री-वश्य-रज्जु-वेध एते दशभेदाः सर्वसाधारणदृष्ट्या अप्रसिद्धास्तथा सर्वसम्मतोऽपि नास्ति। अतः सर्वत्र प्रसिद्धोऽष्टविधमेलापकविचारः वैवाहिकसम्बन्धनिरुपणाय अत्र विचार्यते।

ज्योतिषशास्त्रे लग्नं शरीरं तथा चन्द्रः मनः इति मन्यते। प्रेमः मनसि भवति न तु शरीरेण। एतदर्थं आचार्यैः जन्मराशितः मेलापकविधिः प्रचलितवन्तः। तत्र वर्णमैत्र्यामेको गुणः, वश्ये द्वौ गुणौ, तारायां त्रयः गुणाः, योनिमैत्र्यां चत्वारः, ग्रहमैत्र्यां पञ्च, गणमैत्र्यां षट्, भकूटे सप्तगुणाः तथा नाडीमेलापके अष्टगुणाः स्वीक्रियन्ते। एते सर्वे मिलित्वा षट्त्रिंशत् गुणाः भवन्ति।

**अथ प्रथमगुणः वर्णविचारः-**

सामाजिक वर्णभेद इव राशीनामपि ब्राह्मण, क्षत्रिय, वैश्यः, शूद्रः एते चतुर्भेदाः सन्ति। उच्चवर्णे उच्चभावः परिलक्ष्यते। यदि क्षत्रियवर्णमनुष्योपरि शूद्रवर्णस्य मनुष्यः प्रभावविस्तारः कर्तुमिच्छति चेत् क्षत्रियः तं शूद्रं शमनं करोति। अतः उच्च्चवर्णकन्यकया सह नीचवर्णस्य पुरुषविवाहः अशुभो भवति। परन्तु उच्चवर्णवरेण सह नीचवर्णकन्यकया सह विवाहः शुभप्रदः मन्यते। वरबधूनां जन्मराशिवर्णज्ञानात् तेषां वर्णगुणस्य विचारः क्रियते। यस्य जातकस्य जन्म कर्क-वृश्चिक-मीनराशिषु भवेत्तस्य ब्राह्मणवर्णः, - मेष-सिंह-धनुराशिषु समुत्पन्नः जातकस्य क्षत्रियवर्णः, वृष-कन्या-मकरराशिषु समुत्पन्नजातकस्य वैश्यवर्णः, तथा मिथुन-तुला-कुम्भराशिषु समुत्पन्न जातकस्य शूद्रवर्णः मन्यते। तद्यथा-

**द्विजाझषालिकर्कटास्ततो नृपा विशोऽङ्घ्रिजाः।**

---

[1] मुहूर्तचिन्तामणिः - विवाहप्रकरणम्, श्लो. २१।

© Association of Academic Researchers and Faculties (AARF)
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

**वरस्य वर्णतोऽधिका वधूर्नशस्यते बुधैः ॥**[2]

यदि वरबध्वोः वर्णसमौ भवतः अथवा यदि कन्यावर्णात् वरवर्णः श्रेष्ठः भवेत्तर्हि एको गुणः अन्यथा वरवर्णात् कन्यावर्णः यदि श्रेष्ठः भवेत्तर्हि गुणशून्यं मिलति। तद्यथा-

**एको गुणः सदृग्वर्ण तथा वर्णोत्तमे वरे।**
**हीनवर्णे वरे शून्यं केप्याहुः सदृशे बलम् ॥**[3]

**अथ वश्यविचारः-**

वश्याः पञ्चप्रकारकाः भवन्ति। यथा चतुष्पद, मानवः (द्विपादः), जलचरः, वनचरः, एवं कीटः। तत्र मेष-वृष-सिंह-धनुराशयोत्तरार्द्धः तथा मकरस्य पूर्वार्द्धः चतुष्पादसंज्ञको भवति। सिंहराशिः चतुष्पदः अपि च वनचरः मन्यते। मिथुनः कन्या-तुला धनुराशेः पूर्वार्द्धः कुम्भश्च द्विपदः अर्थात् नरसंज्ञको भवति। मकरस्योत्तरार्द्धः मीनः कर्कश्च जलचरसंज्ञको भवति। वृश्चिकः कीटसंज्ञको भवति। कर्कः जलचरः अपि च कीटसंज्ञको भवति। तद्यथा-

**वृषसिंहधनुर्मेषा मकरार्धं चतुष्पदाः।**
**मृगोत्तरार्धं कुम्भश्च मीनश्चैते जलेचराः ॥**
**नराःमिथुनकन्ये च धनुः पूर्वार्धकं तुला।**
**कीटस्तु कर्कटः प्रोक्तो वृश्चिकश्च सरीसृपः ॥** [4]

उपर्युक्ताः इमे पञ्चवश्याः स्वस्वभावानुसारेण चतुर्षुवर्गेषु विभक्ताः भवन्ति। तद्यथा वश्यः, मित्रं शत्रुः भक्ष्यः इति। वृश्चिकं विहाय सर्वे राशयः सिंहस्य वश्याः तथा सिंहं विहाय सर्वे चतुष्पदाः नृराशिवश्याः भवन्ति। सर्वे जलचराः नृराशेः भक्ष्याः भवन्ति। प्रत्येकवर्गस्य स्ववर्गेण मित्रता तथा धातक वर्गेण सह शत्रुता भवति। तद्यथा-

**हित्वा मृगेन्द्रं नरराशिवश्याः सर्वे**
**तथैषां जलजाश्च भक्ष्याः।**

---

[2] मुहूर्तचिन्तामणिः - विवाहप्रकरणम्, श्लो. २२।
[3] बृ. ज्यौ.सा. - विवाहप्रकरणम्, श्लो. १७।

[4] .बृ. ज्यौ.सा. - विवाहप्रकरणम्, श्लो. १९, २०।

© Association of Academic Researchers and Faculties (AARF)
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

**सर्वेऽपि सिंहस्य वशे विनाऽलि**

**ज्ञेयं नराणां व्यवहारतोऽन्यत् ॥** [5]

अनया रीत्या वरबध्वोः वश्यनिर्धारणं तयोः राश्यानुसारेण क्रियते। पत्नीपत्याधीना न वेति ? तद् ज्ञानार्थं वश्यविचारो क्रियते। यदि वरबध्वोः वश्ये मित्रभावो भवेत्तर्हि युगलाङ्क, यदि एकस्य वश्यभावः अपरस्य भक्ष्यभावो भवेत्तर्हि गुणार्धं , यदि वरबध्वोः वश्यः परस्परं शत्रू अथवा भक्ष्यभावी भवतस्तर्हि गुणशून्यं भवति। तद्यथा-

**सख्यं वैरं च भक्ष्यं च वैश्यमाहु स्त्रिधाः बुधाः।**

**वैरभक्ष्ये गुणाभावो द्वयोः संख्ये गुणद्वयम् ॥**

**वैश्यवैरे गुणस्त्वेको वश्यभक्ष्ये गुणार्धकम् ॥**[6]

**अथ ताराविचारः-**

वरबध्वोः मेलापकविचारे ताराविचारः प्रमुखत्वं भजते। तारकाः नवसंख्यकाः सन्ति। तासां नामानि यथा जन्म-सम्पत्-विपत्-क्षेम-प्रत्यरि-साधक वध-मित्र-अतिमित्रश्च । ताराणां शुभाशुभत्वज्ञानार्थं कन्याजन्मनक्षत्रात् वरनक्षत्रं यावत् गणयेत् तथा वरनक्षत्रादपि कन्यानक्षत्रं यावत् गणयेत्। तत्र या संख्या समायाति, ताः नवभिः विभजेत्। शेषं त्रि-पञ्च-सप्तमवशिष्टं भवेत्तर्हि विपत्-प्रत्यरि-बधसंज्ञकत्वादशुभफलप्रदा तथा द्विचतुरषडाष्टनव-परिमितोऽवशिष्टाङ्कः भवेत्तर्हि शुभफलप्रदा भवति। तद्यथा-

**कन्यर्क्षाद्वरभं यावत्कन्याभं वरभादपि।**

**गणयेन्नवहृच्छेषो त्रीष्वद्रिभमसत्स्मृतम् ॥** [7]

तारामेलापके वरबध्वोः विपत्-प्रत्यरि-बधताराः अशुभाः। एतादृशी परिस्थितौ शून्यं गुणं प्राप्यते। यदि एकस्य तारा शुभा अपरस्याशुभा भवेत्तर्हि गुणाः उभययोः तारे अशुभे भवतः तर्हि शून्यं गुणं मिलति। तद्यथा-

**एकतश्चेच्छुभा तारा परतश्चाशुभा तदा।**

**सार्द्धश्चैको गुणो ग्राह्यस्ताराशुद्ध्या मिथस्त्रयः।**

---

[5] मु.चि., वि.प्र., श्लो. २३।

[6] बृ. ज्यौ.सा. - विवाहप्रकरणम्, श्लो. २१।

[7] मु.चि., वि.प्र., श्लो. २४।

© Association of Academic Researchers and Faculties (AARF)

**उभयोर्न शुभा तारा तदा शून्यं समादिशेत् ॥** [8]

अत्र गुणविभागस्य कारणमपि स्पष्टं भवति । वरबध्वोः विपत् तारा नामानुकूलफलमर्थात् तयोः दाम्पत्यजीवने आगामिनीनां विपत्तिनां सङ्केतं कारयति। वरबध्वोः प्रत्यरितारा तयोः स्वभावे विरोधाभावं प्रदर्शयति। वधतारा दाम्पत्यजीवने आगतस्यानिष्टस्य प्रदर्शिका भवति। एतदर्थमेतास्तारकाः अशुभाः भवन्ति ।

**अथ योनिविचारः**

योनिमेलापकः न केवलं वरबधूनां चयनार्थं भवति अपि तु स्वामीभृत्ययोः मन्त्री-राज्ञोर्मध्ये मेलज्ञानार्थं विचार्यते। योनिः चतुर्दशसंख्याभिः विभक्ताः सन्ति। यथा (१) अश्वः, (२) गजः, (३) मेषः, (४) सर्पः, (५) श्वानः, (६) मार्जारः, (७) मूषकः, (८) गो, (९) महिषः, (१०) व्याघ्रः, (११) मृगः, (१२) वानरः, (१३) नकुलः, (१४) सिंहः । स्त्रीपुरुषयोः प्रीतिज्ञानार्थं योनिविचारो भवति। यथा यदि वरबध्वोः गजयोनि भवेतां तदा परस्परं प्रेमः। तयोः गजसिंह योनी भवेत्तां तदा परस्परं शत्रुत्वं ज्ञातव्यम् । सुखमयं दाम्पत्यजीवननिर्वाहार्थं द्वयोः परस्परं प्रीतियोनिः अन्वेषणीयः। अत्र अश्वादियोनिनां विचारः नक्षत्राधारेण कृताः विद्यन्ते। यथा अश्विनीशततारकयोः अश्वयोनिः, स्वातीहस्तयोः महिषः, धनिष्ठापूर्वभाद्रपदयोः सिंहः, भरणीरेवत्योः गजः, पुष्यकृतिकयोः मेषः, श्रवणपूर्वाषाढयोः वानरः, उत्तराषाढाऽभिजितोर्नकुलः, रोहिणीमृगशीर्षयोः सर्पः, ज्येष्ठाअनुराधे मृगः, मूलार्द्रे श्वानः, पुनर्वस्वाश्लेषयोर्मार्जारः, मघापूर्वाफाल्गुन्योः मूषकः, विशाखाचित्रे व्याघ्रः, उत्तरफाल्गुनी उत्तरभाद्रपदयोः गो योनिः भवति। तद्यथा-

**अश्विन्यम्बुपयोर्हयो निगदित स्वान्त्यर्कयोः कासरः ।**
**सिंहो वस्वजपाद्भयोः समुदितो याम्यन्त्ययो कुञ्जरः ॥**
**मेषो देवपुरोहितानलभयोः कर्णाम्बुनोर्वानरः ।**
**स्याद्वैश्वभिजितो स्तथैव नकुलश्चान्द्राब्जयोन्योरहिः ॥**
**ज्येष्ठामैत्रभयोः कुरङ्ग उदितो मूलद्रयोः श्वा तथा ।**
**मार्जारोऽदिति सार्पयोरथ मघायोन्यो स्तथैवोन्दुरुः ।**
**व्याघ्रो द्वीशभचित्रयोरपि च गौरर्यम्णबुध्न्यक्षयो-**

[8] बृ. ज्यौ.सा. - विवाहप्रकरणम्, श्लो. २३, २४।

© Association of Academic Researchers and Faculties (AARF)
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

**र्योनिः पादगयोः परस्पर महावैरं भयोन्योस्त्यजेत् ।।**[9]

समयोनिकः शुभदायकः, मित्रस्ततथा भिन्नयोनिः मध्यमफलदायकः परन्तु शत्रुयोनिः सर्वथा वर्जितो भवति। वरबध्वोः योनि महावैरं भवेत्तर्हि शून्यं गुणं, वैरं भवेत् चेद गुणमेकं, समौ भवेत्तर्हि युगलाङ्कः, मैत्री भवेत्तर्हि गुणत्रयं, अतिमैत्रं भवेत्तदा गुणाङ्कः चतुः संख्यापरिमितं भवति। तद्यथा

**महावैरं च वैरं च समे चैव यथाक्रमम् ।**
**मैत्रे चैवातिमैत्रे च ख्वैकद्वित्रि चतुर्गुणा ।।** [10]

**अथ ग्रहमैत्रीविचारः-**

जन्मसमये चन्द्रमा यस्मिन् राशौ तिष्ठति तद्राशिः तद्राश्यधिपतिश्च व्यक्तेः सहजस्वभावस्य द्योतको भवति। नैसर्गिकरूपेण सूर्यस्य भौमगुरुचन्द्राः मित्राणि, शुक्रशनी शत्रू, बुधः समसंज्ञको भवति । चन्द्रस्य सूर्यबुधौ मित्रे, शेषाः समाख्याः भवन्ति। कुजस्य गुरुसूर्यचन्द्राः सुहृदः, शनिशुक्रौ समौ, बुधः शत्रुः भवति । बुधस्य सूर्यशुक्रौ मित्रे, चन्द्रः शत्रुस्तथा गुरुशनिभौमाः समाख्याः भवन्ति। गुरोः सूर्यभौमचन्द्राः मित्राणि, बुधशुक्रौ शत्रू तथा शनिः समः भवति। शुक्रस्य बुधशनी मित्रे, रविचन्द्रभौमाः शत्रवः तथा बृहस्पतिः समः भवति । तद्यथा-

**मित्राणि द्युमणेः कुजेज्यशशिनः शुक्रार्कजौ वैरिणौ ।**
**सौम्यश्चास्य समो विधोर्बुधरवी मित्रे, न चास्य द्विषत् ।।**
**शेषाश्चास्य समाः, कुजस्य सुहृदश्चन्द्रेज्यसूर्याः, बुधः ।**
**शत्रुः, शुक्रशनी समौ च शशभृत्सूनोः सिताहस्करौ ।।**
**मित्रे, चास्य रिपुः शशी, गुरुशनिक्ष्माजाः समागीष्पते- ।**
**मित्राण्यर्ककुजेन्दवो, बुधसितौ शत्रू समः सूर्यजः।।**
**मित्रे सौम्यशनी कवेः शशिरवी शत्रू कुजेज्यौ समौ ।**
**मित्रे शुक्रबुधौ शनेः, शशिरविक्ष्माजा द्विषोऽन्यः समः ।।**[11]

---

[9] मु.चि., वि.प्र., श्लो. २५, २६ ।
[10] बृ. ज्यौ.सा. विवाहप्रकरणम्, श्लो. २७।
[11] मु.चि., वि.प्र., श्लो. २७, २८ ।

© Association of Academic Researchers and Faculties (AARF)

गणनागुणैक्यप्रसङ्गे ग्रहमैत्रीसम्बन्धविचारः सप्तविधः । तद्यथा (१) परस्परं मित्र, (२) एकः समः अपरः मित्रम्, (३) एकोऽपरस्य मित्रं परन्तु अपरः एकस्य शत्रुः, (४) परस्परं समौ, (५) एकोऽपरस्य समः परन्तु अपरः एकस्य शत्रुः, (६) परस्परं शत्रुत्वं, (७) उभययोः एकाधिपतित्वम् । उपर्युक्त सप्तविधसम्बन्धेषु प्रथमसम्बन्धे पञ्च, द्वितीयसम्बन्धे एकः, चतुर्थसम्बन्धे त्रयः, पञ्चमसम्बन्धे अर्द्ध, षष्ठसम्बन्धे शून्यं, पुनः सप्तमसम्बन्धे पञ्चगुणङ्को मिलति । तद्यथा-

**ग्रहमैत्रं सप्तविधं गुणाः पञ्च प्रकीर्त्तिताः । तत्रैकाधिपतित्वे च मित्रत्वे गुण पञ्चकम् ॥**
**चत्वारः सममित्रत्वे द्वयोः साम्ये त्रयो गुणाः । मित्रवैरे गुणञ्चैकः समवैरे गुणार्द्धकम् ॥**
**परस्परं खेटवैरे गुणशून्यं विनिर्दिशेत् । असदे सममित्रादौ व्येका ग्राह्य यथोदिताः ॥** [12]

**अथ गणमैत्रीविचारः-**

देव-मनुष्य-राक्षसप्रभेदैः त्रयो गणाः प्रतिपादिताः सन्ति । यदि वरवध्वोः गणसमौ भवतस्तर्हि स्वभावसाम्यत्वात्तयोर्मध्ये गभीरप्रेमः परिलक्ष्यते । यदि एकस्य मनुष्यगण अपरस्य देवगणो भवेत्तर्हि तयोः प्रेमः मध्यमः भवति । यदि वरबध्वोः गणौ देवराक्षसौ नरराक्षसौ वा भवतस्तर्हिं तयोर्मध्ये प्रेमस्याभावः तथा स्वाभाविको मतभेदः परिलक्ष्यते । तद्यथा-

**निजनिजगणमध्ये प्रीतिरत्युत्तमा स्यादमर-मनुजयोः सा मध्यमा सम्प्रदिष्टा ।**
**असुरमनुजयोश्चेन्मृत्युरेव प्रदिष्टो दनुज-विबुधयोः स्याद्वैरमेकान्ततोऽत्र ॥**[13]

नक्षत्रानुरोधेन गणना निर्धारणं भवति । तत्र अश्विनी मृगशीर्ष-पुनर्वसु-पुष्य-हस्त-स्वाती-अनुराधा-श्रवण-रेवती प्रभृतीनि नव नक्षत्राणि देवसंज्ञकानि भवन्ति । भरणी-रोहिणी-आर्द्रा-पूर्वाफाल्गुनी-उत्तराफाल्गुनी-पूर्वाषाढा-उत्तराषाढा-पूर्वाभाद्रपद-उत्तराभाद्रपदप्रभृतीनि नवनक्षत्राणि नरसंज्ञकानि तथा कृतिकाऽऽश्लेषा मघा-चित्रा-विशाखा-ज्येष्ठा-मूल-धनिष्ठा-शतभिषादीनि नवनक्षत्राणि राक्षससंज्ञकानि भवन्ति । तद्यथा-

**रक्षोनरामरगणाः क्रमतो मघाहिवस्विन्द्रमूलवरुणानलतक्षरादधाः ।**

---

[12] बृ.ज्यौ.सा. विवाहप्रकरणम्, श्लो. ३२, ३३, ३४ ।

[13] मु.चि., वि.प्र., श्लो. ३० ।

© Association of Academic Researchers and Faculties (AARF)
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

**पूर्वोत्तरात्रयविधातृयमेशभानि मैत्रादितीन्दुहरिपौष्णमरुल्लघुनि ॥**[14]

गणना गुणैकप्रसङ्गे यदि वरबध्वोः गणौ समौ भवतस्तर्हि षड्गुणाङ्कः, कन्यायाः देवगणः वरस्य मनुष्यगणः यदि भवेत्तर्हि पञ्चगुणाङ्कः, वरस्य देवगणस्तथा कन्यायाः मनुष्यगणः यदि भवेत्तर्हि षड्गुणाङ्कः, एकस्य देवापरस्य राक्षसगणे सति एकगुणाङ्क एवमेकस्य मनुष्यापरस्य राक्षसगणे सति शून्यगुणाङ्को भवति। तद्यथा-

**स्वगणे षड्गुणाः प्रोक्ताः पञ्चदेव मनुष्ययोः। देवराक्षसयोश्चैकः शून्यं मनुजराक्षसोः ॥**[15]

**गणदोषपरिहारः-**

वरबध्वोः राशिस्वामिनी यदि परस्परं मित्रे भवतः अथवा उभययोः राश्याधिपती यदि एकः भवेत्तर्हि गणदोषस्य परिहारो जायते। तद्यथा-

**राशीशयोः सुहृद्भावो मित्रत्वे वांशनाथयोः। गणादिदौष्ट्येप्युद्वाहः पुत्रपौत्रप्रवर्धनः ॥** [16]

**अथ भकूटविचारः-**

वरबध्वोः राश्यन्तरं भकूटमित्युच्यते। अर्थात् वरराशितः कन्याराशिं यावत् अथवा कन्याराशितः वरराशि यावत् भकूटमिति कथ्यते। भकूटं षट् प्रकारकं, यथा (१) प्रथम-सप्तमौ, (२) द्वितीय-द्वादशौ, (३) तृतीयैकादशौ, (४) चतुर्थ-दशमौ, (५) पञ्चम-नवमौ, (६) षडाष्टकौ च। तत्र द्विर्द्वादश, नवपञ्चम तथा षडाष्टक एते दुष्ट भकूटसंज्ञकाः भवन्ति। यदि वरराशितः कन्याराशिः अथवा कन्याराशितः वरराशिः द्वितीये द्वादशे भावे वा भवेत्तर्हि द्विर्द्वादश भकूटाख्यदोषो भवति। उदाहरणार्थं यदि वरराशिः मेषः तथा कन्याराशिः वृषः भवेत्तर्हि वरराशितः द्वितीये कन्याराशिः तथा कन्याराशितः द्वादशे वरराशिः वर्तते चेत् अस्यां परिस्थितौ भकूटदोषो भवति । वरबधूनां जन्मकुण्डली मेलापकसमये यदि द्विद्वादश भकूटदोषः भवेत्तर्हि तेषां वैवाहिकजीवने आर्थिकसंकटं भविष्यति। तथैव यदि वरराशितः कन्याराशिः नवमे पञ्चमे वा भवेत्तर्हि

---

[14] मु.चि., वि.प्र., श्लो. २१।

[15] बृ. ज्यौ.सा. विवाहप्रकरणम्, श्लो. ३७।

[16] बृ. ज्यौ.सा. विवाहप्रकरणम्, श्लो. ३८।

© Association of Academic Researchers and Faculties (AARF)

नवपञ्चमभकूटदोषो भवति। अस्मिन् भकूटदोषे अपत्यनाशो भवति । वरबध्वोः कुण्डली मेलापकसमये यदि वरराशितः षष्ठभावे कन्याराशिः पुनः कन्याराशितः अष्टमे भावे वरराशिः अथवा कन्याराशितः षष्ठभावे वरराशिः तथा वरराशितः अष्टमभावे कन्याराशिः भवेत्तदा षडाष्टकभकूटदोषो भवति। षडाष्टकभकूटः एकः महादोषो भवति। अतः एते द्विर्द्वादश-नवपञ्चमस्तथा षडाष्टकभकूटाः विवाहमेलापके वर्जिताः भवन्ति । उक्तञ्च-

**व्यये न वित्तं न तपस्यपत्यं नायुर्दिषत्येव बधूवराणाम् ।**

**द्विर्द्वादशः पञ्चनवाष्टषष्ठो जन्मर्क्षयो सख्यविधिर्न दृष्टः ॥** [17]

पुनः -

**मृत्युः षट्काष्टके ज्ञेयोऽपत्यहानिर्नवात्मजे । द्विर्द्वादशे दारिद्रत्वं द्वयोरन्यत्र सौख्यकृत् ॥**

शेष भकूटे अर्थात् समसप्तके (प्रथमसप्तमे), तृतीय-एकादशे, तथा चतुर्थ-दशमे विवाहः शुभो भवति । तत्र समसप्तकमेलापके दाम्पत्यसुखस्याभिवृद्धिः भवति । तृतीय-एकादशे दाम्पत्यजीवने आर्थिकस्थितिः तथा जीवनस्तरः समुन्नतो भवति। चतुर्थदर्शमे भकूटे विवाहकरणे दम्पत्योर्मध्ये अतिशयप्रेमः परिलक्ष्यते।

**भकूटदोषस्य परिहारः**

वरकन्ययोः एकराश्याधिपतित्वेन भकूटदोषस्य परिहारो जायते। यतः वरबध्वोः एकराश्याधिपतित्वेन तयोः प्रकृति-मनोवृत्त्यादयो भावाः समानाः भवन्ति। अतः दाम्पत्यसम्बन्धे मधुरता भवति। एतदर्थं एकराश्याधिपतित्वेन भकूटदोषो न भवति। पुनः यदि नाडीदोषः न भवेत्तथा वरबध्वोः राशिः परस्परं मित्रे भवतः तदापि भकूटदोषस्य परिहारो भवति। वरबध्वोः नाडीशुद्धिसहितं नवांशाधिपत्योः मित्रत्वं, नाडीशुद्धिसहितं गणशुद्धिः तथा राशिवश्यत्वसहितं नाडीशुद्धिः यदि भवेत्तर्हि भकूटदोषस्य परिहारो भवति। तद्यथा-

**एकाधिपत्ये राशीशमैत्र्यां दुष्टभकूटके। नाडीनक्षत्रशुद्धिश्चेद्विवाहः शुभदस्तदा ॥**[18]

---

[17] विवाहवृन्दावन मेलकाध्यायः, श्लो. १ ।

[18] बृ. ज्यौ.सा. - विवाहप्रकरणम्, श्लो. ४० ।

© Association of Academic Researchers and Faculties (AARF)
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

**अथ नाडीविचारः-**

जन्मनक्षत्रानुसारेण आदिमध्यान्तनाडीनां निर्धारणं जायते। जातकशास्त्रे सप्तविंशतिनक्षत्राणि स्वीकृतानि सन्ति। तत्र त्रिषु नाडीषु नव-नव नक्षत्राणि समायान्ति। यथा अश्विनी-आर्द्रा-पुनर्वसु-उत्तराफाल्गुनी-हस्त-ज्येष्ठा-मूला-शतभिषा-पूर्वभाद्रपदादि नवर्क्षाणां आदि नाडी, भरणी-मृगशीर्ष-पुष्य-पूर्वफाल्गुनी-चित्रा-अनुराधा-पूर्वाषाढा-धनिष्ठा-उत्तरभाद्रपदादीनां मध्यमनाडी, कृतिका-रोहिणी-आश्लेषा-मघा-स्वाती-विशाखा-उत्तराषाढा-श्रवणा तथा रेवत्यादि नवनक्षत्राणां अन्त्यनाडी भवति।

**ज्येष्ठार्यम्णेशनीराधिपभयुगयुगं दास्रभं चैकनाडी**

**पुष्येन्दुत्वाष्ट्रमित्रान्तकवसुजलभं योनिबुध्न्यो च मध्या।**

**वाय्वग्नित्यालविश्वोडुयुगयुगमथो पौष्णभं चापरास्या-**

**दम्पत्योरेकनाड्यां परिणयनमसन्मध्यनाड्यां हि मृत्युः॥**[19]

मेलापकविचारे यदि वरबध्वोः आद्या नाडी भवेत्तर्हि तयोः वियोगः मध्यनाड्योरुभयोर्विनाशः अन्त्यनाड्योश्च स्त्रीवैधव्यं प्राप्नोति।

**नाडीदोषस्य परिहारः-**

वरबधूनां जन्मलक्षणानां समत्वेन नाडीदोषो भवति परन्तु एकस्मिन् नक्षत्रे भिन्ने चरणे सति नाडीदोषस्य परिहारो भवति। यदि भिन्न भिन्ननक्षत्रोत्पन्नानां वरबधूनां नाडीदोषो भवेत्तर्हि एकराशित्वात् नाडीदोषस्य परिहारो जायते। यथा कस्यचित् जातकस्य जन्मः कृतिकायाः अन्तिमचरणे तथा कस्याऽपिजातिकायाः जन्म रोहिणीनक्षत्रे भवेत्तर्हि उभयोः एकराशित्वात् नाडीदोषस्य परिहारो भवति । तद्यथा-

**नक्षत्रमेकं यदि भिन्नराश्योरभिन्नराश्यो यदि भिन्नमृक्षम्।**

**प्रीतिस्तदानीं निविडा नृनार्यो श्चेत्कृत्तिकारोहिणीवन्नाडी॥**[20]

---

[19] मु.चि., वि.प्र., श्लो. ३४।

[20] विवाहवृन्दावन - मेलकाध्यायः, श्लो. ३।

© **Association of Academic Researchers and Faculties (AARF)**
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

तत्र गणना गुणैक्य चक्रानुसारेण भिन्नभिन्न नाड्यां अष्टौ गुणाङ्का अन्यच्छून्यगुणाङ्गो लभ्यते।

**अष्टविधमेलापकविमर्शः-**

नक्षत्रमेलापके यदि नाडी तथा भकूटशुद्धो भवेत्तथा गुणाः विंशत्याधिकाः भवेयुस्तर्हि विवाहः शुभो भवति। यदि गुणाः पञ्चविंशत्यदधिकाः भवेयुस्तर्हि मेलापकः उत्तमः मन्यते। नाडीभकूटदोषानां परिहारः सन्नपि गुणाः यदि विंशति संख्यातः न्यूनाः स्युस्तर्हि विवाहो अशुभो भवति। गणदोषेऽपि यदि वश्य-तारा-योनि-ग्रहमैत्री भकूट नाड्यादीनां मेलापकाः शुभाः भवेयुस्तर्हि विवाहः कल्याणप्रदः मन्यते। गण-भकूट नाडीदोषादीनां परिहारं विना विवाहः अशुभः। यदि वरवध्वोः राशिस्वामीनी परस्परं शत्रू भवेतान्तथा पञ्चविंशत्यधिकगुणोऽपि प्राप्यते तदा विवाहः शुभाय भवति। नक्षत्रमेलापके अष्टादशसंख्यातः न्यूनो गुणे सति विवाहः अशुभः। तदधिके गुणे शुभः पुनः सप्तविंशत्यधिके गुणे विवाहः अतिशुभः भवति। तद्यथा-

**अशुभऽष्टादशाल्पश्चेत् शुभोष्टादशतोऽधिकः।**

**शुभोऽतिगुणयोगश्चेत्सप्तविंशतितोऽधिकः॥** [21]

एवमेवरूपेण अष्टविधमेलापकस्य विचारः भवति। वरबधूनां जन्मकुण्डलीनां सम्यक् रूपेण परीक्षणं विधाय यदि विवाहसंस्कारो भवेत्तर्हि तेषां दाम्पत्यजीवनं सुदृढं प्रेममयं सुखदञ्च भविष्यति।

**सन्दर्भग्रन्थसूची-**


1. बृहज्ज्यौतिषसारः, सावित्री ठाकुर प्रकाशन, 2014
2. विवाहवृन्दावनम्, चौखम्बा कृष्णदास अकादमी, 1992
3. मुहूर्तचिन्तामणिः, मोतीलाल बनारसीदास, 2019


[21] बृ.ज्यौ.सा. - विवाहप्रकरणम्, श्लो. ४४।


© **Association of Academic Researchers and Faculties (AARF)**